02-11-2020

साहित्यम् । शास्त्री ।

Page No.:
Date: / /

**प्रश्नः** → प्रदत्ते श्लोके छन्दालङ्कारनिर्णयं कुरुत ।

" गुणेषु यत्नः पुरुषेण कार्यो
न किञ्चिदप्राप्यतमं गुणानाम् ।
गुणप्रकर्षादुडुपेन शम्भो-
रलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ।। "

श्रीशूद्रक / मृच्छकटिकम् → ५-२३

**उत्तरम्** →

प्रस्तुतस्य पद्यस्य प्रत्येके चरणे एकादशाक्षराः सन्ति ।

यगणादिनिर्णयः →

गु णे षु य त्नः पु रु षे ण का र्यो
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
जगणः , तगणः , जगणः , गु० , गु०

अस्मिन् पद्ये त्रिष्टुप् छन्दस्य भेदः उपेन्द्रवज्रा छन्दः अस्ति । तल्लक्षणम् →

" उपेन्द्रवज्रा जतजास्ततो गौ । "

अलङ्कारः → अर्थान्तरन्यासः । तल्लक्षणम् →

" सामान्यं वा विशेषो वा तदन्येन समर्थ्यते
सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा । "

02-11-2020

डॉ० निर्मल कुमार झा ( सं० प्राचार्यः )
रा० उ० सं० महावि० सुखसेना , पूर्णियाँ ।

02-11-2020

संस्कृतसामान्यम् ।
उपशास्त्री II
अनिवार्य प्रथमपत्रम् ।

## बहुव्रीहिसमासे रूपसिद्धिः ।

### चित्रगुः ।

लौकिकविग्रहः → चित्रा गावो यस्य सः ।
अलौकिक विग्रहः → चित्रा जस् गो जस् ।

अनेकमन्यपदार्थे इति सूत्रेण अव्ययीभावसमासः ।
कृत्तद्धित समासाश्च इति सूत्रेण प्रातिपदिक संज्ञा ।
सुपोधातुप्रातिपदिकयोः सूत्रेण सुप् लोपः →
चित्रा गो ।
स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी-प्रियादिषु इति सूत्रेण स्त्रीवाचक चित्रा पदस्य पुंवद् भावः →
चित्र गो ।
एकविभक्ति चापूर्वनिपाते इति सूत्रेण नियतविभक्तेः गो शब्दस्य उपसर्जन संज्ञा किन्तु पूर्वप्रयोगः न ।
गोस्त्रियोरुपसर्जनस्य इति सूत्रेण गो शब्दस्य अन्त्यस्वरस्य ह्रस्वः स्यात् → चित्र गु ।
एकदेशविकृतमनन्यवत् न्यायेन पुनः प्रातिपदिक संज्ञा ।
स्वौजसमौट्० सूत्रेण सु → चित्र गु सु ।
उपदेशेजनुनासिक इत्, तस्य लोपः → चित्र गु स् ।
ससजुषो रुः → चित्र गु रु । पुनः इत्संज्ञा, लोपः →
चित्र गु र् । खरवसानयोः विसर्जनीयस्य सूत्रेण रकारस्य विसर्गः → चित्र गु : ।
चित्रगुः ।

(हस्ताक्षर) 02-11-2020
डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

उपशास्त्री I

02-11-2020

संस्कृतसामान्यम् ।

अनिवार्यप्रथमपत्रम् ।

## तत्पुरुषसमासः रूपसिद्धिः ।

### नीलोत्पलम् ।

लौकिकविग्रहः → नीलम् उत्पलम् ।
अलौकिकविग्रहः → नील सु उत्पल सु ।

विशेषणं विशेष्येण बहुलम् इति सूत्रेण तत्पुरुषः समासः ।
कृत्तद्धितसमासाश्च सूत्रेण प्रातिपदिक संज्ञा ।
सुपोधातुप्रातिपदिकयोः सूत्रेण सुप् इत्यस्य लोपः →
नील उत्पल
नील पदस्य उपसर्जन संज्ञा (प्रथमानिर्दिष्टं समास उपसर्जनम्
, उपसर्जनं पूर्वम् → नील उत्पल ।
आद्गुणः → नीलोत्पल ।
पुनः प्रातिपदिक संज्ञा, स्वौजसमौट्० सूत्रेण प्रथमा,
एकवचने सु → नीलोत्पल सु ।
अतोऽम् सूत्रेण सु स्थाने अमादेशः → नीलोत्पल अम् ।
अमि पूर्वः सूत्रेण अम् इत्यस्य अकारस्य पूर्वरूपं
भूत्वा नीलोत्पलम् रूपं निष्पन्नम् ।

02-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ